## പൊതുവിദ്യാഭ്യാസവകുപ്പ് - കേരളം

### കണ്ണൂർ ജില്ലാ പഞ്ചായത്ത്

### ഡയറ്റ് കണ്ണൂർ–സമഗ്രശിക്ഷ കേരളം കണ്ണൂർ



## എസ് എസ് എൽ സി

### വിദ്യാർത്ഥികൾക്കുള്ള പഠനപിന്തുണാസഹായി

# SMILE-2024

**Special Module to Improve achievement Level in public Exams**

# = സംസ്കൃതം =

**കണ്ണൂർ ജില്ലാപഞ്ചായത്ത്**

**പൊതുവിദ്യാഭ്യാസവകുപ്പ്**

**ഡയറ്റ് കണ്ണൂർ-സമഗ്രശിക്ഷ കേരളം കണ്ണൂർ**

# SMILE-2024

**Special Module to Improve achievement Level in public Exams**

**എസ് എസ് എൽ സി – ഹയർസെക്കന്ററി – വൊക്കേഷണൽ ഹയർസെക്കന്ററി**

**വിദ്യാർത്ഥികൾക്കുള്ള പഠനപിന്തുണാസഹായി**

---

***ഉപദേശക സമിതി***

ശ്രീമതി പി പി ദിവ്യ, പ്രസിഡണ്ട്, കണ്ണൂർ ജില്ലാ പഞ്ചായത്ത്

ശ്രീ ബിനോയ് കുര്യൻ, വൈസ് പ്രസിഡണ്ട്, കണ്ണൂർ ജില്ലാ പഞ്ചായത്ത്

അഡ്വ. കെ കെ രത്നകുമാരി, ചെയർപേഴ്സൺ, ആരോഗ്യവിദ്യാഭ്യാസസ്ഥിരം സമിതി, കണ്ണൂർ ജില്ലാ പഞ്ചായത്ത്

***വിദഗ്ധസമിതി***

ശ്രീ. മണികണ്ഠൻ കെ ആർ, ആർ ഡി ഡി, കണ്ണൂർ

ശ്രീമതി അംബിക എ പി, ഡിഡിഇ കണ്ണൂർ

ശ്രീ വി വി പ്രേമരാജൻ, പ്രിൻസിപ്പാൾ, ഡയറ്റ് കണ്ണൂർ

ശ്രീ ഇ സി വിനോദ്, ഡി പി സി, എസ് എസ് കെ, കണ്ണൂർ

ശ്രീമതി ഉദയകുമാരി ഇ ആർ, അസിസ്റ്റന്റ് ഡയരക്ടർ, വിഎച്ച് എസ് ഇ

***കോർഡിനേറ്റർമാർ***

ഡോ കെ വിനോദ്കുമാർ, സീനിയർ ലക്ചറർ, ഡയറ്റ് കണ്ണൂർ

ശ്രീ. എസ് കെ ജയദേവൻ, സീനിയർ ലക്ചറർ, ഡയറ്റ് കണ്ണൂർ

***തയ്യാറാക്കിയത്***

സ്മൈൽ റിസോഴ്സ് ഗ്രൂപ്പ് അംഗങ്ങൾ

***ഏകോപനം***

ജില്ലാവിദ്യാഭ്യാസപരിശീലനകേന്ദ്രം (ഡയറ്റ്), കണ്ണൂർ

==================================================

## आमुखम्

अस्मिन् अध्ययनवर्षे दशमीकक्ष्यायां संस्कृतपरीक्षां लेखितुं सज्जान् सर्वानपि छात्रान् उच्चतरं अङ्कं प्राप्तुं समर्थान् कर्तुं कण्णूर् जिल्लापञ्चायत् संस्थायाः समग्र विद्याभ्यास पद्धत्यनुसारं एषा परीक्षासहायिका निर्मिता अस्ति। अस्याम् परीक्षासहायिकायां अतिलघूनाम्, लघूनाम्, लघूपन्यासानां प्रश्नोत्तरमातृकाः प्रदत्ताः सन्ति। अतः इयम् परीक्षासहायिका अत्यन्तं पश्चात्स्थितानां छात्राणाम् बहूपकारप्रदा भविष्यति। अस्यां सहायिकायां प्रदत्तानां विविधानां प्रश्नोत्तरमातृकाणां निरन्तराभ्यासः छात्रेषु आत्मविश्वासं विवर्धयितुं समर्थो भविष्यति। तथा च प्रश्नानां सम्यक् विश्लेषणं कथं करणीयम्, उत्तराणि कथं लिखितव्यानि इत्यादिषु विषयेषु सदृष्टान्तं मार्गदर्शनं प्रदातुं च सहायकं भवति। इयं परीक्षासहायिका सर्वेषां छात्राणां कृते सन्मार्गप्रदर्शिनी भवतु इत्याशंसयामः। शुभकामना..!!

**प्रयुक्तिपुरुषाः।**

NARAYANAN V J P -Mob: 9946039703

GGVHSS CHERUKUNNU

RAJEESH K - Mob: 9400253433

BVJM HSS PERUMPADAVE

SHIBU M M -Mob: 9496562172

GHSS KUNHIMANGALAM

# प्रथमः पाठः
# आयुरारोग्यसौख्यम्

## I. कोष्टकात् समुचितमुत्तरं चित्वा लिखत -

१. भूगतौ अश्विनीसुतौ कौ ?
   (सुखदुःखौ, परिश्रममिताहारौ, शीतोष्णौ)

२. सुखदुःखयोः कर्ता कः ?
   (मनः, बुद्धिः, आत्मा )

३. **एति** इत्यत्र लकार कः ?
   (लट्, लङ्, लोट् )

४. आरोग्यम् इत्यस्य समानार्थकं पदं किम्?
   (दाक्ष्यम्, स्वास्थ्यम्, श्रुतम् )

५. ईर्ष्याभयक्रोधेन सेव्यमानं किम् न परिपाकमेति ?
   (अन्नम्, धनम्, जलम् )

६. तुष्ठिः केषाम् उत्तमं भवति ?
   (लाभानाम्, सुखानाम्, धनानाम् )

## II. श्लोकम् पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत-

**श्लोकम् - १**

परिश्रमो मिताहारो
**भूगतावश्विनीसुतौ** ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये ॥

१. भूगतौ अश्विनीसुतौ कौ ?

२. कं न समाश्रये ?

३. अस्मिन् श्लोके क्रियापदं किम् ?

४. अधोरेखाङ्कितपदं सन्धिच्छेदं कुरुत ।

५. श्लोके **व्यायामः** इत्यर्थे प्रयुक्तं पदं किम् ?

६. **वैद्यमन्यं** इत्यस्य पदच्छेदः कः ?

**गद्यक्रमं पूरयत**

परिश्रमः —— भूगतौ ——(भवतः)। तौ —— अन्यं —— अहं नैव समाश्रये ।

## उदाहरणानुसारम् एकपदं लिखत

मितश्च असौ आहारः च - मिताहारः ।

हितश्च असौ आहारः च - ——— ।

अल्पश्च असौ आहारः च - ——— ।

## श्लोकम् - २

शनैरर्थः शनैः पन्थाः
शनैः पर्वतमारुहेत् ।
शनैर्विद्या च धर्मश्च
व्यायामश्च शनैः शनैः ।।

१. अर्थः कथं सम्पादनीयम् ?

२. पर्वतं कथं आरुहेत्

३. व्यायामश्च इत्यस्य पदच्छेदः कः ?

४. मार्गः कथं गन्तव्यः ?

## गद्यक्रमं पूरयत

अर्थः शनैः ——— शनैः शनैः ——— आरुहेत् । ——— शनैः धर्मः शनैः च ——— व्यायामः च ।

## श्लोकम् - ३

आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

१ . अस्मिन् श्लोके क्रियापदं किम् ?

२. सुखदुःखयोः कर्तारं इति कं मन्येत ?

३. कीदृशं मार्गं प्रतिपद्येत ?

४. **तस्माच्छ्रेयस्करं** इत्यस्य पदच्छेदः कः ?

## गद्यक्रमं पूरयत

सुखदुःखयोः ——— आत्मानमेव ——— । तस्मात् ————— मार्गं —— न त्रसेत् ।

## श्लोकम् - ४

## श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत ।

धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम् ।
लाभानां श्रेष्ठमारोग्यम्
सुखानां तुष्टिरुत्तमा ।।

१. दाक्ष्यं केषाम् उत्तमम् ?
२. धनानाम् उत्तमं किम् ?
३. लाभानां किं श्रेष्ठम् ?
४. तुष्टिः केषाम् उत्तमम् ?
५. **तुष्टिरुत्तमा** इत्यस्य पदच्छेदः कः ?

**III.समुचितमाशयं चित्वा लिखत -**

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानं
अन्नं न सम्यक् परिपाकमेति ॥

१. स्वस्थचित्तेन सेव्यमानः आहारः आरोग्याय भवति ।
२. स्वकर्मणः फलं स्वशरीरेणैव अनुभूयते ।
३. व्यायामः आहारमितत्वं च आरोग्याय भवति ।

# द्वितीयः पाठः
# दीनवत्सला जननी

**I. कोष्टकात् समुचितमुत्तरं चित्वा लिखत -**

१. सर्वधेनूनां माता का ? -
( सुरसा , गौरी , सुरभिः, लक्ष्मी )
२. दीनवत्सला जननी इति पाठः महाभारते कस्मिन् पर्वणि अन्तर्भवति ?
( वनपर्वणि, उद्योगपर्वणि , सभापर्वणि , भीष्मपर्वणि )
३. अयि शुभे ! किमेवं रोदिषि ? - कस्य वचनमिदम् ?
( सुराधिपस्य , देशाधिपस्य, कृषकस्य , नराधिपस्य )
४. दीनवत्सला जननी इति पाठः कस्मिन् ग्रन्थे अन्तर्भवति ?
( भागवते , रामायणे, महाभारते , शाकुन्तले )
५. वृषभः इत्यस्य समानार्थकं पदं किम् ?
(बलीवर्दः , गर्दभः , वासवः , गजः )
६. दुर्योधनकृतं पाण्डवद्रोहं पश्यन् व्यासः कम् उपेतवान् ?
( द्रोणम् , पाण्डुम् , इन्द्रम् , धृतराष्ट्रम् )
७. दीनवत्सला जननी इति कथायाः प्रतिपाद्यः कः?
( निर्ममता , दीनानुकम्पा , स्वार्थता , कपटता )

## II. कस्य वचनमिदम्

१. अयि शुभे ! किमेवं रोदिषि ?
२. सर्वेष्वपत्येषु जननी तुल्यवत्सला एव ।
३. गच्छ वत्से ! सर्वं भद्रं जायेत।
४. पुत्रः दीन इति जानन्नपि तं ताडयति ।

## III. समानार्थकपदानि चित्वा लिखत ।

( ऋषभः, कृषकः, वासवः, कृषीवलः , इन्द्रः, बलीवर्दः )

| ऋषभः | कृषकः | वासवः |
|---|---|---|
| | | |

## IV. शतृ-शानजन्तरूपाणि विविच्य पट्टिकां लिखत-

( नुद्यमानः, गच्छन् , पठन् , गम्यमानः , जल्पमानः , प्रेरयन् , कम्पमानः , रुदन् , वन्दमानः,पचमानः , ताडयन्, पचन् )

| शत्रन्तरूपाणि | शानजन्तरूपाणि |
|---|---|
| गच्छन् | नुद्यमानः |
| | |
| | |
| | |

## V. पदच्छेदं लिखत -

**नोत्थितः - न + उत्थितः ।**

नोचितः - —— + ——।

नोदितः — —— + ——।

**तथापि - तथा + अपि**

कदापि - — + ——।

तदापि - —— + ——।

**V.उदाहरणानुसारं विग्रहं लिखत -**

**उदा- धनाधिपः - धनानाम् अधिपः।**

जनाधिपः - ———।

**VI.उदाहरणानुसारं वाक्यं परिवर्तयत ।**

**उदा.-** मातुः बहवः पुत्राः सन्ति। दीने पुत्रे कृपार्द्रहृदया भवति ।

**यद्यपि मातुः बहवः पुत्राः सन्ति तथापि दीने पुत्रे कृपार्द्रहृदया भवति।**

१. अहं पाठं सुष्ठु अपठम् । पूर्णमङ्कं न सम्प्राप्तवान् ।

२. जनाः चित्रशालाम् अगच्छन् । तत्र वैद्युतिः नासीत् ।

**VII.सम्बोधनारूपाणां परिचायनम् ।**

शुभे! , वत्से! , वासव! , भद्रे!

**VIII.लङ्-लट् -लोट् रूपाणि पूरयत ।**

| लङ् | लट् | लोट् |
|---|---|---|
| **अपठत्** | **पठति** | **पठतु** |
| ——— | गच्छति | ——— |
| अभवत् | ——— | ——— |
| ——— | ——— | नयतु |

# तृतीयः पाठः
# मधुमान् नो वनस्पतिः

## I. कोष्टकात् समुचितमुत्तरं चित्वा लिखत ।

१. सस्यविज्ञानमधिकृत्य सूचना महाभारतस्य कस्मिन् पर्वणि दृश्यते ?
( वनपर्वणि, शान्तिपर्वणि , सभापर्वणि , भीष्मपर्वणि )

२. "दशपुत्रसमो द्रुमः" - इदं वाक्यं कस्मात् ग्रन्थात् उद्धृतम् ?
(दशकुमारचरितात् , रामायणात् , महाभारतात् , वृक्षायुर्वेदात् )

३. वृक्षायुर्वेदस्य कर्ता कः ?
( धनपालः, सुरपालः, शिशुपालः , महीपालः )

४. फलपाकान्तः सस्यविभागः कः ?
( वीरुत्, वनस्पतिः , ओषधिः , वृक्षः )

५. प्रतानैः प्रसारिता का ?
( वनस्पतिः ,वीरुत्, ओषधिः , वृक्षः )

६. अव्यक्तपुष्पः यः फलति सः ——— ।
( वृक्षः, वीरुत्, वनस्पतिः , ओषधिः)

७. फलात्पूर्वं पुष्पं स्पष्टं दृश्यते ——— ।
( वनस्पतिः, वीरुत्, वृक्षः, ओषधिः)

८. दशकूपसमा का ?
( पुत्रः , द्रुमः , वापी , सरः)

९.सस्यानि प्रमुखतया कतिविधं भवति ?
(द्विविधम् , त्रिविधम् , चतुर्विधम् , पञ्चविधम् )

## II. पदच्छेदं लिखत ।

**जागरूकोऽभवत् - जागरूकः + अभवत् ।**

पण्डितोऽपि - ——— + ——— ।

कोऽपि - ——— + ——— ।

**ओषधिश्च - ओषधिः + च ।**

भूपतिश्च - ——— + ——— ।

कविश्च - ——— + ——— ।

**हेतुरभूत् - हेतुः + अभूत् ।**

गुरुरयम् - ——— + ——— ।

विष्णुरपि - ——— + ——— ।

**काव्येऽस्मिन्** - **काव्ये** + **अस्मिन्** ।
नाटकेऽस्मिन् - ——— + ——— ।
लोकेऽस्मिन् - ——— + ——— ।

**III.टिप्पणीलेखनम् ।**

**१.सूचनानुसारं सस्यसंरक्षणमधिकृत्य टिप्पणीं लिखत ।**

सूचनाः - जीवनसंरक्षणाय सस्यसंरक्षणम् ———पौराणिकभारतीयाः ———दत्तश्रद्धाः ——— सस्यरोपणं परिपालनं च ——— औषधाय——— भोजनाय ——— वृक्षमहत्वं ज्ञात्वा प्रवर्त्तनम् ।

**२. सूचनानुसारं सस्यानां प्रभेदान्यधिकृत्य टिप्पणीं लिखत ।**

सस्यानि प्रमुखतया ——— वृक्षः, ———। अव्यक्तपुष्पः——— ——— वीरुत् ——— ओषधिः ........उदाहरणानि ——— ।

**IV. पट्टिकां पूरयत ।**

( कर्कटी, आम्रः , व्रीहिः, अश्वत्थः, नालिकेरः ,पनसः , इक्षुः , कूश्माण्डः)

| **वृक्षः** | **वनस्पतिः** | **वीरुत्** | **ओषधिः** |
|---|---|---|---|
| आम्रः | पनसः | कूश्माण्डः | इक्षुः |
| | | | |

**V.यथोचितं योजयत ।**

| | |
|---|---|
| चरकसंहिता | सुरपालः |
| ऋषभः | वनस्पतिः |
| वृक्षायुर्वेदः | शानजन्तम् |
| नुद्यमानः | बलीवर्दः |
| पनसः | चरकः |

# चतुर्थः पाठः

# कनकधारा

**I.कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१. कनकधारास्तवम् केन विरचितम्?

(श्रीशङ्करेण , माधवविद्यारण्यस्वामिना , सुरपालेन )

२.शङ्करदिग्विजयम् नाम काव्यं कस्मिन् काव्यविभागे अन्तर्भवति ?

(खण्डकाव्ये , महाकाव्ये , चरित्रकाव्ये )

३. शङ्करदिग्विजयस्य कर्ता कः ?

( श्रीनारायणगुरुः ,श्रीशङ्करः ,माधवविद्यारण्यस्वामी)

४. श्रीशङ्कराचार्यस्य चरितमवलम्ब्य रचितम् काव्यं किम् ?

(सौन्दर्यलहरी , शङ्करदिग्विजयम् , शिवानन्दलहरी )

५. **सह** शब्दयोगे का विभक्तिः ?

(पञ्चमी , तृतीया , द्वितीया )

६. अद्वैतचिन्ताप्रतिष्ठापकः कः ?

(श्रीशङ्करः , श्रीनारायणगुरुः , माधवविद्यारण्यस्वामी )

७ **धिक्** शब्दयोगे का विभक्तिः ?

(पञ्चमी , तृतीया , द्वितीया )

**II. यथोचितं योजयत ।**

१.

| | |
|---|---|
| श्रीशङ्करः | धात्रीफलम् |
| शङ्करदिग्विजयम् | दरिद्रः |
| आमलकम् | कनकधारा |
| धनहीनः | महाकाव्यम् |

२.

| | |
|---|---|
| वरिवस्याम् | भिक्षा |
| निशम्य | ऐश्वर्यदेवता |
| मुरभित्कुटुम्बिनी | शुश्रूषाम् |
| भैक्ष्यम् | ल्यबन्तम् |

## III. उदाहरणानुसारं विग्रहवाक्यं लिखत ।

उदा - गुरुमहिमा -गुरोः महिमा ।

तरुमहिमा = --------------।

उदा - सामोदम् - आमोदेन सह वर्तते ।

साश्चर्यम् - ---------------।

सादरम् - --------------- ।

## IV. उदाहरणानुसारं पदच्छेदं लिखत ।

उदा - उदीरयन्त्यसौ - उदीरयन्ती + असौ ।

विलपन्त्यसौ - ----- + ----।

उदा - धिगिदम् - धिक् + इदम् ।

वागियम् - -----+ -----।

## V. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

### श्लोकं १

स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया ।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित् ।।

(क) भगवान् कीदृशस्य द्विजन्मनः भवनं विवेश ?

(ख) भगवान् किमर्थं द्विजन्मनः भवनं विवेश ?

(ग) अस्मिन् पद्ये क्रियापदं किम् ?

(घ) भगवान् कैः सह द्विजन्मनः भवनं विवेश ?

### गद्यक्रमं पूरयत।

गुरोः कुले वसन् ------सवयोभिः सह जातु कस्यचित् -------द्विजन्मनः-----भवनं ------।

### श्लोकं २

तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी ।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते ।।

(क) अस्मिन् श्लोके क्रियापदं किम् ?

(ख) **तमवोचत-** पदच्छेदं लिखत ?

(ग) का सादरं अवोचत ?

(घ) केषु वरिवस्यां प्रतिपादयन्ति ?

**गद्यक्रमं लिखत।**

तत्र -----कुटुम्बिनी तं ------सादरं अवोचत । ये ------ वरिवस्यां प्रतिपादयन्ति ते ----।

**श्लोकं ३**

विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः ।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

(क) कस्मै भैक्ष्यं वितरीतुं न शक्नुमः ?

(ख) वयं केन वञ्चिताः?

(ग) श्लोके **निष्प्रयोजनम्** इत्यर्थे प्रयुक्तं पदं किम् ?

(घ) **धिगिदं** इत्यस्य पदच्छेदं लिखत ?

**श्लोकं ४**

स मुनिर्मुरभित्कुटुम्बिनीं
पदचित्रैर्नवनीतकोमलैः ।
मधुरैरुपतस्थिवांस्तवै-
र्द्विजदारिद्र्यदशानिवृत्तये ।।

(क) अस्मिन् पद्ये क्रियापदं किम् ?

(ख) किमर्थं शङ्करः ऐश्वर्यदिवतां उपासितवान् ?

(ग) सः मुनिः कीदृशैः स्तवैः लक्ष्मीं उपासितवान् ?

(घ) **ऐश्वर्यदिवतां** इत्यर्थकं पदं श्लोकात् चित्वा लिखत ।

**गद्यक्रमं पूरयत।**

स मुनिः-------- नवनीतकोमलैः --------मधुरैः-------स्तवैः-------उपतस्थिवान् ।

**श्लोकं ५**

अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनताया हृदयं च विस्मयैः ।।

(क) अस्मिन् श्लोके क्रियापदं किम् ?

(ख) का तोषिता अभवत् ?

(ग) कस्याः हृदयं विस्मयैःअपूरयत् ?

(घ) **परितः** इति पदस्य समानार्थकं पदं श्लोकात् चित्वा लिखत ?

**गद्यक्रमं पूरयत।**

अमुना वचनेन-------कमला------समन्ततः------- अपूरयत्। विस्मयैः------- हृदयं च ।

**V I (क).अपरेषां कृते प्रयोजनरहितं जन्म निन्दनीयम् - इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया ।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित् ।।

विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः ।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

**(ख) करुणं वचनं आकर्ण्य सः दयार्द्रहृदयः अभवत् - इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

इति दीनमुदीरयन्त्यसौ
प्रददावामलकं व्रतीन्दवे ।
करुणं वचनं निशम्य सोऽ-
प्यभवज्ज्ञाननिधिर्दयार्द्रधीः।।

तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी ।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते ।।

**VII.श्लोकस्य उचितमाशयं चित्वा लिखत ।**

तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी ।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते ।।

(क) अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकमेव ।

(ख) ब्रह्मचारिश्रेष्ठानां पूजां कुर्वन्तः पुण्यवन्तः एव ।

(ग) स्तवेन सन्तुष्टा कमला ब्राह्मणस्य भवनं सुवर्णामलकैः पूरयामास ।

**VIII.सम्भाषणं पूरयत ।**

शङ्करः - मात! भिक्षां देहि ।

ब्रह्मण पत्नी - बालकः ! कस्त्वम् ?

शङ्करः - अम्ब ! --------- आगतः ब्रह्मचारि बालकोऽहम् ।

ब्रह्मण पत्नी - भिक्षार्थं वा ? दारिद्र्यात् भैक्ष्यमपि दातुम् असमर्थायाः मम जन्म ----------भवति ।

शङ्करः - मात! चिन्ता मास्तु ।

ब्रह्मण पत्नी - इदम् आमलकं ------- ।

शङ्करः - --------।

# पञ्चमः पाठः

# जयन्ति ते सुकृतिनः।

## I. कोष्टकात् समुचितमुत्तरं चित्वा लिखत।

१. "स्वराज्यं अस्माकं जन्माधिकार एव"- कस्य वचनमिदम्?

(डा.एस् राधाकृष्णस्य , बालगङ्गाधरतिलकस्य , महात्मागान्धिनः)

२.भारतस्य प्रथमः उपराष्ट्रपतिः कः?

( राजेन्द्रप्रसाद्, डा.एस् राधाकृष्णः,जेवहर्लाल् नेह्रु )

३.गीतारहस्यं केन विरचितम्?

(डा.एस् राधाकृष्णः,जेवहर्लाल् नेह्रु,बालगङ्गाधरतिलकः)

४.महात्मागान्धिनः आत्मकथायाः नाम किम्?

( गीतारहस्यम्, सत्यशोधनम्, नवभारतम् )

५.वेदानां कालनिर्णयं कर्तुं प्रयतितेषु अन्यतमः कः?

(बालगङ्गाधरतिलकः, महात्मागान्धिः, डा.एस् राधाकृष्णः)

६.**वेदान्तस्य धार्मिकता** इति ग्रन्थस्य कर्ता कः?

(डा. राजेन्द्रप्रसादः, महात्मागान्धिः, डा.एस् राधाकृष्णः)

७.**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन** इति वचनं कस्मात् ग्रन्थात् उद्धृतम्?

(रामायणात्, हितोपदेशात्, भगवत्गीतायाः )

८. **ऋते** शब्दयोगे का विभक्तिः भवति?

(पञ्चमी, चतुर्थी, तृतीया )

९. ओक्स्फोर्ड् सर्वकलाशायां प्रथमतया पाठनाय कः अगच्छत् ?

(डा. राजेन्द्रप्रसादः, महात्मागान्धिः, डा.एस् राधाकृष्णः)

## II.यथोचितं योजयत।

| | |
|---|---|
| बालगङ्गाधरतिलकः | आत्मकथा |
| डा. एस् राधाकृष्णः | ओक्टोबर् २ |
| सत्यशोधनम् | गीतारहस्यम् |
| महात्मागान्धी | वेदान्तस्य धार्मिकता |

## III. उदाहरणानुसारं विश्लेषयत।

**उदा - पुत्रोऽपि - पुत्रः + अपि ।**

बालोऽपि - ---- + -----।

पराजितोऽपि - ---- + -----।

ततोऽपि - ---- + -----।

**IV. उदाहरणानुसारं एकपदं लिखत ।**

**उदा -पुरुषेषु उत्तमः - पुरुषोत्तमः ।**

नृपेषु उत्तमः ---------।

नरेषु उत्तमः ---------।

सर्वेषु उत्तमः ---------।

**V.उदाहरणानुसारं एकपदं लिखत ।**

**उदा - राष्ट्रस्य पतिः - राष्ट्रपतिः।**

कुलस्य पतिः - ---------।

राज्यस्य पालकः -------।

**VI. उदाहरणानुसारं वाक्यं परिवर्त्य लिखत ।**

उदा**-** महानसे लवणं नास्ति । अन्यत् सर्वं अस्ति ।

**महानसे लवणात् ऋते अन्यत् सर्वं अस्ति ।**

भोजनाय पायसं नास्ति। अन्यत् सर्वं अस्ति ।

स्यूते पुस्तकं नास्ति । अन्यत् सर्वं अस्ति ।

आपणे पुष्पं नास्ति । अन्यत् सर्वं अस्ति ।

**VII.सूचनानुसारं जीवनचरितं लिखत ।**

**१.सूचनाः**

| | |
|---|---|
| नाम | मोहन्दास् करंचन्द् गान्धी। |
| जन्म | 1869 ओक्टोबर् 2 पोर्बन्दर् (गुजरात्)। |
| पितरौ | करंचन्द् गान्धी, पुतलीभायी । |
| प्रशस्तिः | भारतस्य राष्ट्रपिता, स्वातन्त्र्यसमरसेनानी । |
| मृत्युः | 1948 जनुवरि 30 नवदिल्ली। |

**२.सूचनाः**

| | |
|---|---|
| नाम | अक्कित्तम् अच्चुतन् नम्पूतिरि । |
| जन्म | 1926 मार्च् 18 पालक्काट् कुमरनेल्लूर् । |
| प्रवृत्तिमण्डलम् | कविः, सामूह्यप्रवर्तकः , पत्रप्रवर्तकः। |
| प्रधानकृतयः | वेण्णक्कल्लिन्टे कथा , बलिदर्शनम्, निमिषक्षेत्रम् । |
| मरणम् | 2020 ओक्टेबर् 15 । |

## ३.सूचनाः

| | |
|---|---|
| नाम | डा. पि. के. नारायणपिल्ला। |
| जननम् | 1910 डिसंबर् 24 तिरुवल्ला । |
| मातापितरौ | गोदवर्मा, लक्ष्मि अम्मा च। |
| प्रशस्तिः | कैरलिसाहित्यकारः, संस्कृतपण्डितः च । |
| पुरस्कारः | केन्द्रसाहित्य अक्कादमी, केरलसाहित्य अक्कादमी च। |
| कृतयः | विश्वभानुः, कैरलीध्वनिः, साहित्यकेली च। |
| दिवंगतः | 1990 मार्च् 20 । |

# षष्ठः पाठः

# रागसुधारस...।

**I. कोष्टकात् समुचितमुत्तरं चित्वा लिखत।**

१." एन्तरो महानुभावुलु" इति कीर्तनं कस्मिन् रागे निबद्धम्?

(भूपालरागे, हिन्दोलरागे, श्रीरागे)

२.सङ्गीतविद्यायाः नामान्तरं किम्?

(धनुर्विद्या, गान्धर्वविद्या, वास्तुविद्या)

३.तञ्जावूर् देशाधिपः कः?

(त्यागराजस्वामी, शरभोजी, षट्कालगोविन्दमारार)

४.कां वृत्तिं आश्रित्य त्यागराजः जीवितम् अनयत्?

(उञ्छवृत्तिं, कार्षिकवृत्तिं, शिल्पवृत्तिं)

५." एन्तरो महानुभावुलु" इति कीर्तनं कं प्रकीर्त्य आलपति स्म?

(त्यागराजस्वामिनं, षट्कालगोविन्दमारारं, शरभोजिनं )

६.त्यागराजेन विरचिता हिन्दोलरागनिबद्धा कृतिः कस्यां भाषायां आसीत् ?

(संस्कृतभाषायां , तेलुगुभाषायां, मलयालभाषायां )

७.त्यागराजं द्रष्टुमागतः केरलीयसंगीतज्ञः कः?

(षट्कालगोविन्दमारार् , शरभोजी, स्वातितिरुनाल्)

८. शरभोजी कस्य देशास्य अधिपः आसीत् ?

(तेलुगुदेशस्य , तिरुवय्यार् देशस्य , तञ्जावूर् देशस्य )

**II. यथोचितं योजयत ।**

| | |
|---|---|
| शरभोजी | नादोपासकः |
| सामजवरगमन | केरलीयसंगीतज्ञः |
| त्यागराजः | तञ्जावूर् देशाधिपः |
| षट्कालगोविन्दमारार् | हिन्दोलम् |

**III. उदाहरणानुसारं विश्लेषयत।**

**उदा- तेनैव - तेन + एव ।**

अनेनैव ------+ -----।

केनैव ------+ -----।

**उदा- केयम् - का + इयम् ।**

सेयम् - ------+ -----।

**IV.अधोदत्तात् वाक्यात् क्त्वान्त-ल्यबन्त- तुमुन्नन्त पदानि चित्वा लिखत ।**

1. महाराजस्य आदेशं श्रुत्वा अपि त्यागराजः राजप्रशस्तिपरां कृतिं विरच्य प्रदातुं सन्नद्धो नाभवत् ।

2. विद्यालयं आगत्य व्यायामस्य महत्वं पठित्वा टिप्पर्णीं लेखितुम् अध्यापकः अवदत् ।

# सप्तमः पाठः

# काव्यमुक्तावलिः ।

## 1. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।

क) कविकुलगुरुः कः?

(कालिदासः, भासः, व्यासः)

ख) किरातार्जुनीयस्य कर्ता कः?

(श्रीहर्षः, भारविः, माघः)

ग) कुमारसम्भवस्य प्रणेता कः ?

(कालिदासः, भासः, भारविः)

घ) लीलाकमलपत्राणि का गणयामास ?

(सीता, दमयन्ती, पार्वती)

ङ) उपमा कालिदासस्य भारवेः -----------।

(पदलालित्यं, अर्थगौरवम्, अलङ्कारवैभवम्)

च) माघम् इति कस्य महाकाव्यस्य नामान्तरं भवति ?

(रघुवंशस्य, नैषधीयचरितस्य, शिशुपालवधस्य)

छ) --------- विद्वदौषधम् ।

(माघम्, नैषधम्, रघुवंशम्)

ज) चेदिराजः कः ?

(नलः, दुर्योधनः, शिशुपालः)

## 2. अधोदत्तं श्लोकं पठित्वा उत्तराणि लिखत ।

**(क)** एवं वादिनि देवर्षौ
पार्श्वे <u>पितुरधोमुखी</u> ।
लीलाकमलपत्राणि
गणयामास पार्वती ।।

(क) पार्वती कानि गणयामास ?

(ख) अस्मिन् पद्ये क्रियापदं किम् ?

(ग) पार्वती पितुः पार्श्वे कथं स्थितवती ?

(घ) रेखाङ्कितपदं विश्लेषयत ।

**गद्यक्रमं पूरयत ।**

देवर्षौ ——— पार्वती ——— पार्श्वे ——— लीलाकमलपत्राणि ——— ।

**(ख)** वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य ? ।।

(क) अस्मिन् पद्ये क्रियापदं किम् ?

(ख) "मद्वचनात् स राजा वाच्यः"- केन वाच्यः ?

(ग) **अक्ष्णोः समीपं** इत्यस्य एकपदं लिखत ?

(घ) **<u>विशुद्धामपि</u>** - पदच्छेदं कुरुत ।

**(ग)** इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ।।

(क) चित्तवृत्तयः कीदृशाः भवन्ति ?

(ख) श्लोकात् एकं क्रियापदं चित्वा लिखत ?

(ग) **इमामहं -** इत्यस्य पदच्छेदं लिखत।

(घ) श्लोके **मनः** इत्यर्थे प्रयुक्तं पदम् किम् ?

**(घ)** न मुमोच लोचनजलानि
दयितजयमङ्गलैषिणी ।
यातमवनिमवसन्नभुजा-
न्न **<u>गलद्विवेद</u>** वलयं विलासिनी ।।

(क) का लोचनजलानि न मुमोच ?

(ख) श्लोकात् एकं क्रियापदं चित्वा लिखत ?

(ग) श्लोके **पृथ्वीम्** इत्यर्थे प्रयुक्तं पदं किम् ?

(घ) अधोरेखाङ्कितपदं विश्लेषयत ?

**3.पट्टिकां पूरयत ।**

| कृतिः | कर्ता | कथापात्रम् |
|---|---|---|
| रघुवंशम् | ................................ | सीता |
| ................................ | कालिदासः | पार्वती |
| नैषधीयचरितम् | श्रीहर्षः | ................................ |
| किरातारजुनीयम् | ................................ | द्रौपती |
| ................................ | माघः | भटस्त्री |

# अष्ठमः पाठः

# शिवास्ते सन्तु पन्थानः।

## I. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।

(क) अभिज्ञानशाकुन्तलस्य कर्ता कः ?

(श्रीहर्षः, कालिदासः, व्यासः)

(ख) अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?

(पञ्च, षट्, सप्त)

(ग) अभिज्ञानशाकुन्तलस्य इतिवृत्तं कस्मात् ग्रन्थात् स्वीकृतम् ?

(महाभारतात्, रामायणात्, भागवतात्)

(घ) पुरुवंशराजा कः ?

(दुर्योधनः, दुष्यन्तः, युधिष्ठिरः)

(ङ) अभिज्ञानशाकुन्तले मुख्यरसः कः ?(हास्यः, करुणः, शृङ्गारः)

## II.सम्बोधनारूपं लिखत ।

(क) वत्से ! त्वं इतः पतिगृहं गच्छ ।

(ख) तात ! इत एव किं प्रियसख्यौ निवर्तिष्येते ।

(ग) वत्स ! इति त्वया मद्वचनात् स राजा वक्तव्यः।

**III. पट्टिकां पूरयत ।**

| कृतिः | कर्ता | विभागः |
|---|---|---|
| अभिज्ञानशाकुन्तलम् | कालिदासः | ________ |
| ________ | माधवविद्यारण्यस्वामी | महाकाव्यम् |
| महाभारतम् | ________ | इतिहासः |
| कनकधारास्तवम् | श्रीशङ्कराचार्यः | ________ |

**IV. सूचनानुसारं कण्वमहर्षेः स्वभावं लिखत ।**

**सूचनाः-** कालिदासः ------अभिज्ञानशाकुन्तलम् ------- चतुर्थोङ्कः ------ दुष्यन्तस्य उपदेशं ---- त्रिकालज्ञानी ----------- आत्मीयभौतिककार्ये निष्णातः।

# नवमः पाठः

# ईशोपदेशः।

## I. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।

(क) क्रिस्तुभागवतस्य कर्ता कः ? (पी.सी.देवस्या, वेदव्यासः, अश्वघोषः)

(ख) येशुदेवः पर्वतोपरिस्थित्वा कृताः उपदेशाः केन नाम्ना प्रसिद्धाः ?
(सूक्ति प्रभाषणम्, गिरिप्रभाषणम्, धर्मप्रभाषणम् )

(ग) क्रिस्तुभागवते कति सर्गाः सन्ति ? (विंशति, त्रिंशत्, त्रयस्त्रिंशत्)

(घ) क्रिस्तुभागवतं कस्मिन् काव्यविभागे अन्तर्भवति ?
(महाकाव्ये, चरित्रकाव्ये, इतिहासकाव्ये)

(ङ) **नाकं** इत्यस्य समानार्थकं पदं किम् ? (भूमिः, स्वर्गः, सर्पः)

## II. श्लोकं पठित्वा गद्यक्रमं पूरयत ।

(क) ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः ।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा ।।

यदा भवान् तु --------ददाति तदा यथा नृणां विलोकं -------च लिप्सवः दाम्भिकाः ------रथ्यासु च ------- अग्रतः न कारयेत् ।

(ख)	यूयं स्वधर्माचरणं परेषा-
मालोकनार्थं जनतासमक्षम् ।
मा कार्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तुङ्गकृपाप्रसादः ।।

यूयं -------परेषां आलोकनार्थं ------मा कार्ष्ट ।एवं यदि------ उत्तुङ्गकृपाप्रसादः न -----।

**III. अधोदत्तं श्लोकं पठित्वा उचितमाशयं चित्वा लिखत ।**

यदा पुनः प्रार्थयसे तदा गृहं
प्रविश्य बद्ध्वा च कवाटमेककः।
कुरु स्वतातं प्रति याचनां रहः
पिता फलं दास्यति गुप्तदर्शकः ।।

(क) प्रदर्शनार्थम् ईश्वरभजनं कुर्वन्तः कपटभक्ताः भवन्ति।

(ख) धर्माचरणं आत्मनिर्वृत्यर्थं भवेत् ।

(ग) गुप्तपरमतत्वप्रदर्शकः ईशः नूनं फलं दास्यति ।

**IV. "दक्षिणहस्तेन कृतं भिक्षादानं वामहस्तः मा जानातु"** इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत ।

(क)	ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः ।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा ।।

(ख)	भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।।

# दशमः पाठः
# प्राप्य वरान् निबोधत ।

## I. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।

क) विश्वजिन्नाम यागं कः चकार ?

(विश्वामित्रः, वाजस्रवसः, कण्वः)

ख) यम-नचिकेत संवादः कस्मिन् उपनिषदि प्रतिपादितम् ?

(कठोपनिषदि, मुण्ठकोपनिषदि, तैत्तिरियोपनिषदि)

ग) "त्वां मृत्यवे ददामि " कस्य वचनमिदम् ?

(नचिकेतसः, यमदेवस्य, वाजस्रवसस्य)

घ) "उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत" - इति वाक्यं कस्मिन् उपनिषदि वर्तते ?

(कठोपनिषदि, माण्डूक्योपनिषदि, तैत्तिरीयोपनिषदि)

ङ) वाजस्रवसः किं नाम यागं चकार ?

(विश्वजित्, पुत्रकामेष्ठि, अश्वमेधम्)

## II. श्लोकं पठित्वा आशयं चित्वा लिखत ।

१. उत्तिष्ठत जाग्रत
प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस्तत्कवयो वदन्ति ।।

(क) अज्ञानिनः निरङ्कुशाः भवन्ति ।

(ख) स्वयं पण्डितंमन्याः अज्ञाः कुपन्थानं प्राप्नुवन्ति ।

(ग) अज्ञानं दूरीकर्तुं श्रेष्ठान् उपगच्छन्तु ।

२. अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितंमन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा
अन्धेनैव नीयमानाः यथान्धाः ।।

(क) अज्ञानं दूरीकर्तुं श्रेष्ठान् उपगच्छन्तु ।

(ख) अज्ञानिनः निरङ्कुशाः भवन्ति ।

(ग) स्वयं पण्डितंमन्याः अज्ञाः कुपन्थानं प्राप्नुवन्ति ।

**III.अधोदत्तेभ्यः वेदाः वेदाङ्गानि उपनिषदश्च विविच्य पट्टिकां रचयतु ।**

ऋक्, निरुक्तम्, कठम्, छन्दः, सामः, माण्डूक्यम्, अथर्वः, तैत्तिरीयम्, शिक्षा, ईशम्, व्याकरणम्, यजुः ।

| वेदाः | वेदाङ्गानि | उपनिषदः |
|---|---|---|
| | | |

**IV.प्रादेशिकभाषायां परिवर्त्य लिखत ।**

**अभ्यासः १**

भारतीयसौन्दर्यशास्त्रस्य प्रसिद्धः आचार्यः अस्ति आनन्दवर्धनः।सः 'काव्यस्यात्मा ध्वनिः' इति काव्यलोके नवीनमेकं सिद्धान्तम् आविष्कृतवान् । आचार्यस्य अस्य जीवितकालः नवमे शताब्दे कश्मीरदेशे आसीत्। कश्मीरस्य राज्ञः अवन्तिवर्मणः समकालिकः आसीदयम्। देवीशतकं, अर्जुनचरितं, विषमबाणलीला, तत्त्वालोकः च तस्य प्रमुखकृतयः भवन्ति।

**अभ्यासः २**

दृश्यश्रव्यभेदेन काव्यं द्विविधमस्ति। दर्शनसुखात्मकं काव्यं दृश्यकाव्यमिति कथ्यते। अभिनयप्रधानं भवति दृश्यकाव्यम्।दृश्यकाव्यस्य रूपकमिति नामान्तरमपि अस्ति। भारतीयदृश्यकाव्यानां प्राग्रूपं वेदेषु दृश्यते।

**अभ्यासः ३**

महाकविना कालिदासेन विरचितं महाकाव्यं भवति कुमारसंभवम् । कालिदासेन विरचितयोः महाकाव्ययोः अन्यतमम् भवति इदं काव्यम् ।सप्तदशसर्गयुक्तं कुमारसंभवं अद्य उपलभ्यन्ते ।तथापि तेषु अष्टसर्गपर्यन्तमेव कालिदासेन कृतमिति विदुषामभिप्रायः ।काव्येस्मिन् पार्वतीपरमेश्वरयोः विवाहपर्यन्ता कथा प्रतिपादयति ।

**अभ्यासः ४**

आराधनालयेषु प्रचलितं कलारूपं भवति सोपानसङ्गीतम् ।जयदेव कविना विरचितात् गीतगोविन्दात् स्वीकृतानि गीतानि उपयुज्य एव सोपानसङ्गीतम् आलपति ।स्वातितिरुनाल् कृतिः अपि आलपति ।रागाधिष्ठितं भवति एतत् सङ्गीतम् ।रागस्य विस्तारे सोपानरीत्या आरोहणावरोहणक्रमं पालयति इति कारणेन अस्य सोपानसङ्गीतमिति नाम लब्धम् ।

**V.खण्डिकां पठित्वा प्रश्नानामुत्तरं लिखत -**

केरलराज्यस्य सांस्कृतिकनगरी भवति तृशूर् । तृश्शिवपेरूर् इति तस्याः पौराणिकं नाम । चाक्यार् कूत्त् , पाठकम्,कूटियाट्टम् ,कथाकेलिः,इत्यादीनि कलारूपाणि अत्र परिपोषितानि । अत्र प्रतिवर्षं सञ्चाल्यमानः तृशूर् पूरम् इति महोत्सवः विश्वप्रसिद्धः भवति ।केरलीयकलारूपाणां परिपोषणाय स्थापितं केरलकलामण्डलम् **अत्रैव** चेरुतुरुत्ति ग्रामे विराजते । साहित्य अक्कादमी , सङ्गीत-नाटक अक्कादमी , ललितकला अक्कादमी चेति संस्थात्रयं कलासाहित्यक्षेत्रेषु अनुत्तमं योगदानं निर्वहति ।

क) केरलराज्यस्य सांस्कृतिकनगरी कुत्र भवति ?

ख) कानि कलारूपाणि तत्र परिपोषितानि ?

ग) केरलकलामण्डलम् कुत्र ?

घ) अधोरेखाङ्कितपदस्य पदच्छेदम् लिखत ?

*********************